इति हेमचन्द्रः॥ देवताड़वृक्षः। इति रत्नमाला॥
(आखुमांसगुणा यथा,—
("आखोर्मांसं सपदि बहुधा खण्डखण्डीकृतं यत्तैले
पाच्यं द्रवति निरतं यावदेतन्न सम्यक्।
तत्तैलाक्तं वसनमनिशं योनिभागे दधाना,
हन्ति व्रीड़ाकरभगफलं नात्र सन्देहबुद्धिः"॥
इति वैद्यकचक्रपाणिसंग्रहः॥)

आखुकर्णी, स्त्री (आखोः कर्णमिव पत्रमस्याः। आखुकर्ण+ङीप्) लताविशेषः। मूषाकाणी इति भाषा। तत्पर्य्यायः। द्रवन्तिका २ द्रवन्ती ३ चित्रा ४ सुवर्णी ५ उन्दुरुकर्णी ६ न्यग्रोधी ७ मूषककर्णी ८ वृश्चिकर्णी ९ बहुकर्णिका १० माला ११ भूमिचरी १२ चण्डा १३ शम्बरी १४ बहुपादिका १५ प्रत्यक्श्रेणी १६ वृषा १७ पुत्रश्रेणी १८ अद्रिभूः १९। अस्या गुणाः। कटुत्वं उष्णत्वं। कफपित्तहरत्वं। सारकत्वं। आनाहज्वरशूलनाशित्वं। परमपाचकत्वं। इति राजनिर्घण्टः॥
"आकुपर्णी आकुकर्णी कर्णिका भूदरीभवा।
आखुकर्णी कटुस्तिक्ता कषाया शीतला लघुः॥
विपाके कटुका मूत्रकफामयकृमिप्रणुत्"।
इति भावप्रकाशः॥

आखुगः, पुं, (आखुना गच्छति यः। गणेशस्य मूषिकवाहनत्वात् तथात्वं।) गणेशः। इति हेमचन्द्रः॥

आखुपर्णिका, स्त्री, (आखोः कर्णमिव पर्णमस्याः।) लताविशेषः। इति रत्नमाला॥ इन्दुरकाणी इति भाषा। (आखुपर्णीशब्दे आखुककर्णीशब्दे चास्या गुणादयो ज्ञातव्याः।)

आखुपर्णी, स्त्री, (आखोः कर्णमिव पर्णमस्याः।) आखुपर्णिका। इति रत्नमाला॥
"मुस्ताखुपर्णीफलदारुशिग्रु-
क्वाथः सकृष्णा क्रिमिशक्रकल्कः।
मार्गद्वयेनापि चिरप्रवृत्तान्
क्रिमीन्निहन्यात् क्रिमिजांश्च रोगान्"॥
इति वैद्यकचक्रपाणिसंग्रहः।
"आखुपर्णीकिशलयैः सुपिष्टैः पिष्टमिश्रितैः।
पक्वा पूपलिकां खादेद्धान्याम्लञ्च पिबेदनु"॥
इति वाभटः॥ गुणादयोऽन्येऽस्या आखुकर्णीशब्दे ज्ञातव्याः॥)

आखुपाषाणः, पुं, पाषाणभेदः। आखुपाषाणनामोऽयं लोहसंकरकारकः। इति राजनिर्घण्टः॥

आखुभुक् [ज्] पुं, (आखून् भुङ्क्ते यः। आखु+भुज्+क्विप्) विड़ालः। इत्यमरः॥

आखुरथः, पुं, (आखुः रथो वाहनं यस्य।) गणेशः। इति हलायुधः॥

आखुविषहा, स्त्री, (आखोर्विषं हन्ति या।) देवताड़वृक्षः? इति जटाधरः॥ देवदालीलता। इति राजनिर्घण्टः॥

आखेटः, पुं, (आङ्+खिट्+घञ्) मृगया। इत्यमरः॥ शिकार इति भाषा। ("शुभगाखेटभूमित्वं"। कथासरित्सागरे १५।१२०।

आखेटकः, पुं, (आङ्+खिट्+ण्वुल्।) मृगया। इति शब्दरत्नावली॥ यथा पञ्चतन्त्रे।
"आखेटकस्य धर्म्मेण विभवाः स्युर्वशे नृणाम्।
नृप्रजाः प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव"॥)

आखेटशीर्षकं, क्ली, कुट्टिमभेदः। इति शब्दरत्नावली सुड़ङ्ग इति भाषा। (यदुक्तं।
"कपिशीर्षं द्रुमशीर्षं तथा चाखेटशीर्षकं।
इति कुट्टिमभेदाः स्युः शाब्दिकैः समुदाहृताः"।)

आखेटिकः, पुं, (आखेटे मृगयायां कुशलः। आखेट+ठक्।) मृगयाकुशलकुक्कुरः। तत्पर्य्यायः। आखेटिकः २ विश्वकद्रुः ३। इति हारावली॥ (मृगयाकर्त्ता। त्रासजनकः। भयङ्करः। मृगयुः। व्याधः।)

आखोटः, पुं, (आख+उट्।) फलवृक्षविशेषः। आखरोट् इति भाषा। तत्पर्य्यायः। पार्व्वतीयः २ फलस्नेहः ३ गुड़ाशयः ४ कोरेष्टः ५ कन्दरालः ६ मधुमज्जा ७ बृहच्छदः। अस्य गुणाः। मधुरत्वं। बलकारित्वं। स्निग्धत्वं। उष्णत्वं। वातपित्तनाशित्वं। रक्तदोषप्रशमनत्वं। शीतलत्वं। कफकोपनत्वं। इति राजनिर्घण्टः॥ (आक्षोड़शब्दे आक्षोटशब्दे चास्य गुणादिकं ज्ञेयं।)

आख्या, स्त्री, (आङ्+ख्या+अङ्+टाप्) नाम। संज्ञा। इत्यमरः॥ यथा कुमारसम्भवे १।२६।
"उमेति मात्रा तपसो निषिद्धा .
पश्चादुमाख्यां सुमुखी जगाम"।

आख्यातं, त्रि, (आङ्+ख्या+क्तः) कथितं। उक्तं। इत्यमरः॥ (प्रथितः, प्रसिद्धः, प्रकाशितः।) व्याकरणोक्तधातूत्तरविहिततिङ्प्रत्ययादि॥

आख्यानं, क्ली, (आङ्+ख्या+ल्युट्) कथनं। यथा
"कथितं मङ्गलाख्यानं ब्रह्मपुत्त्र यथागमं।
देवी मङ्गलचण्डी या तदाख्यानं निशामय"॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१ अध्यायः॥

आख्यायिका, स्त्री, (आङ्+ख्या+ण्वुल्। टाप्।) उपलब्धार्थकथा। इत्यमरः॥ इतिहास उपन्यास इति ख्याता॥ (आख्यायिकालक्षणं। यथा,—
"प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः।
परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित्"
इति च साहित्यदर्पणे।
"आख्यायिका कथावत्स्यात् कवेर्वंशादिकीर्त्तनं"

आगः, [स्] क्ली, पापं। अपराधः। इत्यमरः॥ (यथा शिशुपालवधे ३य सर्गे १०८ श्लोकः।
"सहिष्ये शतमागांसि सूनोस्ते इति यत्त्वया"।)

आगतं, त्रि, (आङ्+गम्+क्तः।) आयातं। उपस्थितं॥ (लब्धः। प्राप्तः यथा, हितोपदेशे।
"आगतन्तु भयं वीक्ष्य प्रतिकुर्य्यात् यथोचितम्"।)

आगन्तुः, त्रि, (आङ्+गम्+तुन्।) अतिथिः। इत्यमरः॥ आगमनशीलः। अनियतः॥
("अकस्मादागन्तुना सह विश्वासो न युक्तः"।
इति हितोपदेशः। आकस्मिकरोगादि। यथा,
"आगन्त्वपि शरीरशल्यव्यतिरेकेण यावन्तोभावा दुःखमुत्पादयन्ति"। इति सुश्रुतः।
निजागन्तुभेदेन रोगस्य कारणद्वैविध्यादागन्तुशब्दोऽयमामयस्यान्यतरकारणवाची।
तद्यथा,—
"द्विविधा पुनः प्रकृतिरेषामागन्तुनिजविभागात्"। "मुखानि तु खल्वागन्तोर्नखदशनपतनाभिचाराभिशापाभिषङ्गवधबन्ध-पीड़न-रज्जु-दहन-मन्त्राशनि-भूतोपसर्गादीनि"।
"आगन्तुर्हि व्यथापूर्व्वमुत्पन्नो जघन्यं
वातपित्तश्लेष्मणां वैषम्यमापादयति"।
उदाहरणं। "तत्रागन्तवश्छेदनभेदनक्षणनभञ्जनपिच्छनोत्पेषणवेष्टनप्रहार-वध-बन्धन-व्यधन-पीड़नादिभिर्व्वा। भल्लातक-पुष्पफलरसात्मगुप्तासूकक्रिमिसूकाहितपत्रलतागुल्मसंस्पर्शनैर्वा स्वेदनपरिसर्पणावमूत्रणैर्व्वा विषिणाम्॥ सविषाविषप्राणिदन्तविषाणनखनिपातनैर्व्वा।
सागरविषवात-हिम-दहन-संस्पर्शनैर्व्वा शोथाः समुपजायन्ते"॥ इति चरकेणोक्तं॥

आगन्तुकं, त्रि, (आगन्तु+स्वार्थे कन्) आहार्य्यं। अनित्यस्थायि। इति त्रिकाण्डशेषः॥
(अज्ञातकुलशीलादिर्नवागतः पुरुषः। यथाः
"त्वया च मूलभृत्यानपास्यायमागन्तुकः पुरस्कृतः"। इति हितोपदेशे॥ अतिथिः। अज्ञातस्वामिकः पश्वादिः। यथा याज्ञवल्क्ये॥
"महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः।
पालो येषां तु ते मोच्या दैवराजपरिप्लुताः"॥
आकस्मिकक्षतादिरोगः। यथा, सुश्रुते।
"शलश्वल आशु गमने धातुस्तस्य शल्यमितिरूपं तत् द्विविधं, शारीरमागन्तुकं च"। इति॥)

आगमं, क्ली, (आङ्+गम+अच्।) तन्त्रशास्त्रं। अस्यार्थः। यथा तन्त्रशास्त्रं॥
"आगतं पञ्चवक्त्रात्तु गतञ्च गिरिजानने।
मतञ्च वासुदेवस्य तस्मादागममुच्यते"॥ इति
(एतल्लक्षणं यथा,—
"सृष्टिश्च प्रलयश्चैव देवतानां तथार्च्चनं।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च॥
षट्कर्म्मसाधनं चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधाः"॥ इति
यथा रघुवंशे। १०।२६॥
"बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः")

आगमः, पुं, (आ+गम्+अच्।) शास्त्रमात्रं।)
("आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः"।
इति किराते। ५। २२।) आगमनं। इति मेदिनीकरहेमचन्द्रौ॥ (अर्थादीनामागमः। यथा, नीतिशतके ७३ श्लोके। "नित्यव्यया प्रचुरनित्यधनागमा च"। इति। प्राप्तिः। उपार्जनम्।
"नाधर्म्मेणागमः कश्चिन्मनुष्यान् प्रति वर्त्तते"।
इति मनुः॥)
साक्षिपत्रादिः। इति व्यवहारमातृका॥ प्रकृतिप्रत्ययानुपघाति कार्य्यं। इति व्याकरणं॥ (शास्त्रज्ञानं। श्रुतवत्ता। यथा,
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः"।
इति रघुवंशे १म सर्गे १५। यथा च रघौ १४।८०।
"तामर्पयामास च शोकदीनां
तदागमप्रीतिषु तापसीषु"॥)